# Nalus

Maha-bharati episodium

Textus Sanscritus cum interpretatione Latina et annotationibis criticis

Curante

Francisco Bopp

Altera emendata editio

Berolini

Prostat in Libraria Fr. Nicolai

MDCCCXXXII

Als Kuriosum bringen wir hier das erste Kapitel der Nala-Übersetzung in das Lateinische von Franz Bopp (1791–1867), die als erste Auflage 1819 in London und dann Jahre später als zweite Auflage 1832 in Berlin in der Nicolaischen Verlagsbuchhandlung erschien, wo dann Franz Bopp in 1838 auch eine deutsche Übersetzung der Nala-Geschichte veröffentlichte.

Bṛhad-aśva uvāca |
āsīd_rājā nalo nāma vīrasena-suto balī |
upapanno guṇair_iṣṭai rūpavān_aśva-kovidaḥ || 1 ||
atiṣṭhan_manujendrāṇāṃ mūrdhni deva-patir_yathā |
upary_upari sarveṣām_āditya iva tejasā || 2 ||

Vrihadasvus dixit:
Fuit rex, Nalus nomine, Virasēni-filius validus, |
praeditus virtutibus optatis, formosus, equorum-peritus. || 1 ||
Stabat hominum-regum in fronte, deorum-dominus veluti, |
super super omnibus, sol veluti splendore; || 2 ||

Ulrich Stiehl,
Heidelberg im Dezember 2008

# NALUS

# MAHA-BHARATI EPISODIUM.

TEXTUS SANSCRITUS CUM INTERPRETATIONE LATINA ET ANNOTATIONIBUS CRITICIS


CURANTE

**FRANCISCO BOPP,**

DR., PROFESSORE PUBL. ORDIN. ACAD. REG. BORUSS. SOCIO ORDINARIO, INSTIT. REG. AMSTELOD. SODALI, SOCIETT. REG. ASIAT. PARIS. ET LONDIN. SOCIO.


*ALTERA EMENDATA EDITIO.*


BEROLINI.

PROSTAT IN LIBRARIA FR. NICOLAI.

MDCCCXXXII.

EX OFFICINA ACADEMICA.

वृहदश्व उवाच

आसीद् राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैर् इष्टै रूपवान् अश्वकोविदः ॥ १ ॥
अतिष्ठन् मनुजेन्द्राणाम् मूर्ध्नि देवपतिर् इव ।
उपर्य् उपरि सर्वेषाम् आदित्य इव तेजसा ॥ २ ॥
ब्रह्मण्यो वेदविच् छूरो निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महान् अक्षौहिणीपतिः ॥ ३ ॥
ईप्सितो वरनारीणाम् उदारः संयतेन्द्रियः ।
रक्षिता धन्विनां श्रेष्ठः साक्षाद् इव मनुः स्वयम् ॥ ४ ॥

---

## LIBER PRIMUS.

### Vrihadasvus dixit:

1. Fuit rex, Nalus nomine, Vîrasêni-filius validus, | praeditus virtutibus
2. optatis, formosus, equorum-peritus. ‖ Stabat hominum-regum in
fronte, Deorum-dominus veluti, | super super omnibus, sol veluti
3. splendore; ‖ religiosus, *Vêdorum*-gnarus, heros, in Nischadhis terrae-
dominus, | talorum-amicus, veridicus, magnus exercitus-dominus; ‖
4. exoptatus egregiarum-feminarum, eximius, frenatis-sensibus, | servator,

तथै 'वा ''सीद् विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर् युक्तः प्रजाकामः स चा 'प्रजः ॥ ५ ॥
स प्रजार्थे परं यत्नम् अकरोत् सुसमाहितः ।
तम् अभ्यगच्छद् ब्रह्मर्षिर् दमनो नाम भारत ॥ ६ ॥
तं स भीमः प्रजाकामस् तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ॥ ७ ॥
तस्मै प्रसन्नो दमनः सभार्याय वरन् ददौ ।
कन्यारत्नङ् कुमारांश् च त्रीन् उदारान् महायशाः ॥ ८ ॥
दमयन्तीन् दमन् दान्तन् दमनञ् च सुवर्चसम् ।
उपपन्नान् गुणैः सर्वैर् भीमान् भीमपराक्रमान् ॥ ९ ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।

---

5. sagittariorum optimus, perinde ut Manus ipse. ‖ Ita quoque fuit in
Vidarbhis Bhîmus timendâ-vi, | heros, omnibus-virtutibus junctus,
6. progeniei-cupidus, isque privatus-progenie. ‖ Iste progeniei-causâ
eximium nisum fecit perintentus. | Eum adiit *brahmanicus*-sapiens,
7. Damanus nomine, Bhârate! ‖ Hunc ille Bhîmus progeniei-cupidus
exhilaravit officiorum-gnarus, | cum conjuge, regum-princeps! hos-
8. pitio persplendidum. ‖ Ei propitius Damanus cum-conjuge (ei) gra-
tiam impertiit, | puellarum-margaritam, puerosque tres eximios, ma-
9. gnam-gloriam *habens:* ‖ Damayantiam, Damum, Dântum, Damanum-
que persplendidum, | praeditos virtutibus omnibus, timendos, ti-

सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥ १० ॥
अथ तां वयसि प्राप्ते दासीनां समलङ्कृतम् ।
शतं शतं सखीनाञ् च पर्युपासच् छचीम् इव ॥ ११ ॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्ये ऽनवद्याङ्गी विद्युत् सौदामिनी यथा ॥ १२ ॥
अतीव रूपसम्पन्ना श्रीर् इवा ऽऽयतलोचना ।
न देवेषु न यक्षेषु तादृग् रूपवती क्वचित् ॥ १३ ॥
मानुषेष्व् अपि चा ऽन्येषु दृष्टपूर्वा ऽथवा श्रुता ।
चित्तप्रमाथिनी बाला देवानाम् अपि सुन्दरी ॥ १४ ॥
नलश् च नरशार्दूलो लोकेष्व् अप्रतिमो भुवि ।
कन्दर्प इव रूपेण मूर्तिमान् अभवत् स्वयम् ॥ १५ ॥

---

10. mendâ-vi. ‖ Damayantia autem formâ, splendore, gloriâ, venustate, | fortunâque in mundis famam adepta est pulchro-medio corpore *prae-*
11. *dita.* ‖ At eam, aetate contactâ, servae ornatae | centum, centum
12. amicaeque circumsedebant, Satschiam veluti. ‖ Ibi splendebat Bhaimia omnibus-ornamentis-decorata, | in amicarum-medio, pulchra-membra
13. *habens,* fulgur veluti; ‖ maxime pulchritudine-praedita, Sria veluti longos-oculos habens. | Non inter Deos, non inter Yacschos talis for-
14. mosa uspiam, ‖ inter homines etiamque alios visa-antê, vel audita; | ani-
15. mos-quatiens puella, Deorum etiam, pulchra. ‖ Nalusque virorum-princeps inter homines incomparabilis in terra, | Candarpus veluti formâ,

तस्याः समीपे तु नलम् प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीम् पुनः पुनः ॥ १६ ॥
तयोर् अदृष्टकामो ऽभूत् शृण्वतोः सततङ् गुणान् ।
अन्योन्यम् प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥ १७ ॥
अशक्नुवन् नलः कामन् तदा धारयितुं हृदा ।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥ १८ ॥
स ददर्श ततो हंसान् जातरूपपरिष्कृतान् ।
वने विचरतान् तेषाम् एकञ् जग्राह पक्षिणाम् ॥ १९ ॥
ततो ऽन्तरीक्षगो वाचं व्याजहार नलन् तदा ।
हन्तव्यो ऽस्मि न ते राजन् करिष्यामि तव प्रियम् ॥ २० ॥
दमयन्तीसकाशे त्वाङ् कथयिष्यामि नैषध ।

---

16. corporeus erat ipse. ‖ In illius propinquitate Nalum celebrabant cum
voluptate; | in Naischadhi propinquitate vero Damayantiam iterum ite-
17. rum. ‖ Eorum non-visi-amor factus est, audientium semper virtutes, |
18. alterius-alterum adversus, Cauntêye! hoc crescebat desiderium. ‖ Im-
potens Nalus amorem tum sustinendi corde, | gynaeceo-vicinâ in silvâ
19. sedet, clam profectus; ‖ is vidit dehinc anseres auro-ornatos; | in silva
20. ambulantium horum unam cepit avem. ‖ Deinde volucris sermonem
dixit Nalo tum: | occidenda sum non a te, rex! faciam tibi carum; ‖
21. in Damayantiae-praesentia te memorabo, Naischadhe! | ut quam te

यथा त्वद् अन्यम् पुरुषन् न सा मंस्यति कर्हिचित् ॥ २१ ॥
एवम् उक्तस् ततो हंसम् उत्ससर्ज महीपतिः ।
ते तु हंसाः समुत्पत्य विदर्भान् अगमंस् ततः ॥ २२ ॥
विदर्भनगरीङ् गत्वा दमयन्त्यास् तदा ऽन्तिके ।
निपेतुस् ते गरुत्मन्तः सा ददर्श च तान् गणान् ॥ २३ ॥
सा तान् अद्भुतरूपान् वै दृष्ट्वा सखीगणावृता ।
हृष्टा ग्रहीतुङ् खगमांस् त्वरमाणो ऽपचक्रमे ॥ २४ ॥
अथ हंसा विससृपुः सर्वतः प्रमदावने ।
एकैकशस् तदा कन्यास् तान् हंसान् समुपाद्रवन् ॥ २५ ॥
दमयन्ती तु यं हंसं समुपाधावद् अन्तिके ।
स मानुषीङ् गिरङ् कृत्वा दमयन्तीम् अथा ऽब्रवीत् ॥ २६ ॥

---

22. alium virum non ea cogitatura sit unquam. ‖ Sic compellatus deinde
anserem dimisit terrae-dominus. | Illi vero anseres, postquam evo-
23. laverant, in Vidarbhos iverunt deinde. ‖ Vidarbha-nagarim profecti,
Damayantiâ tum coram | delapsi sunt hi alites; illa viditque has tur-
24. bas. ‖ Ea has miranda-forma *praeditas* postquam conspexerat, ami-
carum-turbâ-circumdata, | laeta captare volucres festinans incepit. ‖
25. Tum anseres dispersi sunt quoquoversus in voluptaria-silva. | Sin-
26. gulatim tum puellae istos anseres accurrerunt. ‖ Damayantia vero
quem anserem accurrit coram, | is, humana voce facta, Damayantiam

दमयन्ति नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास् तस्य मानुषाः ॥ २७ ॥
तस्य वै यदि भार्या त्वम् भवेथा वरवर्णिनि ।
सफलन् ते भवेज् जन्म रूपञ् चे ऽदं सुमध्यमे ॥ २८ ॥
वयं हि देवगन्धर्वमानुषोरगराक्षसान् ।
दृष्टवन्तो न चा ऽस्माभिर् दृष्टपूर्वस् तथाविधः ॥ २९ ॥
त्वञ् चा ऽपि रत्नन् नारीणान् नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन सङ्गमो गुणवान् भवेत् ॥ ३० ॥
एवम् उक्ता तु हंसेन दमयन्ती विशाम् पते ।
अब्रवीत् तत्र तं हंसन् त्वम् अप्य् एवन् नले वद ॥ ३१ ॥
तथे ऽत्य् उक्त्वा ऽण्डजः कन्यां विदर्भस्य विशाम् पते ।

---

27. tum allocutus est: ॥ Damayantia! Nalus nomine in Nischadhis terrae-dominus, । Aśvinorum similis formâ, non similes ejus homines. ॥
28. Hujus certe si uxor tu esses, venusta! । cum-fructu tua esset nativitas,
29. formaque haec, pulchro-medio corpore *praedita!* ॥ Nos enim Deos-Gandharvos-homines-serpentes-Râcschasos । tuiti, neque a nobis
30. visus-ante talis. ॥ Tuque etiam margarita feminarum, inter virosque Nalus decus; । egregiae cum egregio congressus excellens esset. ॥
31. Sic compellata vero ab ansere Damayantia, Visorum domine! । dixit
32. ibi anseri: Tu etiam sic Nalo dic. ॥ «Ita;» sic fatus ovo-natus ad

पुनर् आगम्य निषधान् नले सर्वन् न्यवेदयत् ॥ ३२ ॥

॥ इति नलोपाख्याने प्रथमः सर्गः ॥ १ ॥

वृहदश्व उवाच

दमयन्ती तु तच् छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलम् प्रति बभूव सा ॥ १ ॥
ततश् चिन्तापरा दीना विवर्णवदना कृशा ।
बभूव दमयन्ती तु निःश्वासपरमा तदा ॥ २ ॥
ऊर्ध्वदृष्टिर् ध्यानपरा बभूवो ऽन्मत्तदर्शना ।

---

filiam Vidarbhi, Visorum-domine! । rursus aggressus in Nischadhos, Nalo omnia denuntiavit. ॥

## LIBER SECUNDUS.

Vrihadasvus dixit:

1. Damayantia vero, hoc audito sermone anseris, Bhârate! । abhinc in
2. posterum non apud se, Nalum versus erat ea. ॥ Deinde cogitationi-
addicta, misera, pallido-ore, macera । erat Damayantia, suspirationi-
3. addicta tum. ॥ Sursum-adspectum *habens*, meditabunda, erat demens-




**Sanskrit-Kompendium.**
**Ein Lehr-, Übungs- und Nachschlagewerk**
Devanagari-Ausgabe. Von Ulrich Stiehl
4., überarb. und erw. Auflage, Heidelberg 2007, 512 Seiten,
Großformat: 17 x 24,5 cm, Festeinband mit Fadenheftung,
Ladenpreis nur 49,90 Euro, ISBN 978-3-87081-539-4
Verlagsgruppe Hüthig Jehle Rehm GmbH,
Im Weiher 10, 69121 Heidelberg, Tel. 06221/489-0.
Bestellung über jede Buchhandlung oder direkt beim Verlag.

Dieses Werk ist das erste Sanskritlehrbuch, das alle Möglichkeiten moderner Sprachdidaktik vollständig ausschöpft. Es ermöglicht erstmals ein zeitminimierendes Universitätsstudium, aber es ist auch bestens zum Selbststudium für Autodidakten geeignet. Obwohl es das Lernen so leicht wie möglich macht, geht es hinsichtlich des vermittelten Stoffs (Wortschatz, Formenlehre und Syntax) weit über das Niveau früherer Lehrbücher hinaus.

Prof. Dr. Dr. Manfred Mayrhofer urteilt:

*"Ihr Buch ist wirklich eine gigantische Pionierleistung. Ich habe in meiner aktiven Zeit viel Sanskrit gelehrt. Wie man etwa mit dem "Stenzler" unterrichten könne, war mir immer schleierhaft; am ehesten ging es noch mit dem Büchlein von Georg Bühler, das ja in Österreich, nachdem Bühler in Wien wirkte, reichlich vorhanden war. Aber mit Ihrer gründlichen Arbeit ist das alles nicht vergleichbar."*

Die 4. Neuauflage 2007 wurde um den "Teil 8: Textanalyse: Bhagavad-Gita" erweitert, der eine grammatikalische Analyse der Anfangskapitel der Bhagavad-Gita mit detaillierten Erläuterungen aller Feinheiten der Formen- und Satzlehre enthält, um den Lernenden den Übergang von dem Lehrbuch zur Lektüre von Originaltexten zu erleichtern.

Zu weiteren Einzelheiten siehe die Leseprobe: http://www.sanskritweb.net/deutsch/leseprobe.pdf

Websites: http://www.sanskritweb.net http://www.sanskritweb.org http://www.sanskritweb.de